# শিৱাষ্টকম

## Shivashtakam

---

শিৱ অষ্টকম

প্রভুং প্রাণনাথং ৱিভুং ৱিশ্ৱনাথং জগন্নাথনাথং সদানন্দভাজম |
ভৱদ্ভৱ্যভূতেশ্ৱরং ভূতনাথং শিৱং শঙ্করং শংভুমীশানমীডে ||১||

গলে রুণ্ডমালং তনৌ সর্পজালং মহাকালকালং গণেশাধিপালম |
জটাজূটগঙ্গোত্তরঙ্গৈর্ৱিশালং শিৱং শঙ্করং শংভুমীশানমীডে ||২||

মুদামাকরং মণ্ডনং মণ্ডযন্তং মহামণ্ডলং ভস্মভূষাধরং  তম |
অনাদিং হ্যপারং মহামোহমারং শিৱং শঙ্করং শংভুমীশানমীডে ||৩||

তটাধোনিৱাসং মহাট্টাট্টহাসং মহাপাপনাশং সদা সুপ্রকাশম |
গিরীশং গণেশং সুরেশং মহেশং শিৱং শঙ্করং শংভুমীশানমীডে ||৪|

গিরীন্দ্রাত্মজাসঙ্গৃহীতার্ধদেহং গিরৌ সংস্থিতং সর্ৱদা সন্নিগেহম |
পরব্রহ্ম ব্রহ্মাদিভির্ৱন্দ্যমানং শিৱং শঙ্করং শংভুমীশানমীডে ||৫||

কপালং ত্রিশূলং করাভ্যাং দধানং পদাংভোজনম্রায কামং দদানম |
বলীৱর্দযানং সুরাণাং প্রধানং শিৱং শঙ্করং শংভুমীশানমীডে ||৬||

শরচ্চন্দ্রগাত্রং গুণানন্দপাত্রং ত্রিনেত্রং পৱিত্রং ধনেশস্য মিত্রম |
অপর্ণাকলত্রং চরিত্রং ৱিচিত্রং শিৱং শঙ্করং শংভুমীশানমীডে ||৭||

হরং সর্পহারং চিতাভূৱিহারং ভৱং ৱেদসারং সদা নির্ৱিকারম |
শ্মশানে ৱসন্তং মনোজং দহন্তং শিৱং শঙ্করং শংভুমীশানমীডে ||৮||

স্তৱং যঃ প্রভাতে নরঃ শূলপাণেঃ পঠেত্সর্ৱদা ভর্গভাৱানুরক্তঃ |
স পুত্রং ধনং ধান্যমিত্রং কলত্রং ৱিচিত্রৈঃ সমারাদ্য মোক্ষং প্রযাতি ||৯||

ইতি শ্রীশিৱাষ্টকং সংপূর্ণম ||

**www.shaivam.org**

---